# ગોદાષ્ટોત્તરશતનામાવલિઃ

godAShTottarashatanAmAvaliH

sanskritdocuments.org

June 22, 2019

# godAShTottarashatanAmAvaliH

# ગોદાષ્ટોત્તરશતનામાવલિઃ

## Sanskrit Document Information

Text title : godAShTottarashatanAmAvaliH

File name : godAShTottarashatanAmAvaliH.itx

Category : devii, aShTottarashatanAmAvalI, nAmAvalI, nadI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : See corresponding stotram

Acknowledge-Permission: Pandit Shri Rama Ramanuja Acharya, srimatham.com

Latest update : June 22, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

June 22, 2019

*sanskritdocuments.org*

# ગોદાષ્ટોત્તરશતનામાવલિઃ

ૐ શ્રીરઙ્ગનાયક્યૈ નમઃ । ગોદાયૈ । વિષ્ણુચિત્તાત્મજાયૈ ।
સત્યૈ । ગોપીવેષધરાયૈ । દેવ્યૈ । ભૂસુતાયૈ । ભોગશાલિન્યૈ ।
તુલસીવનસઞ્જાતાયૈ । (તુલસીકાનનોદ્ભુતાયૈ) શ્રીધન્વિપુરવાસિન્યૈ ।
શ્રીભટ્ટનાથપ્રિયકર્યૈ । શ્રીકૃષ્ણહિતભોગિન્યૈ । આમુક્તમાલ્યદાયૈ ।
બાલાયૈ । શ્રીરઙ્ગનાથપ્રિયાયૈ । પરાયૈ । વિશ્વમ્ભરાયૈ । કલાલાપાયૈ ।
યતિરાજસહોદર્યૈ । શ્રીકૃષ્ણાનુરક્તાયૈ નમઃ ॥ ૨૦॥

ૐ સુભગાયૈ નમઃ । સુલભશ્રિયૈ । શ્રીસુલક્ષણાયૈ ।
લક્ષ્મીપ્રિયસખ્યૈ । શ્યામાયૈ । દયાઞ્ચિતદૃગઞ્ચલાયૈ ।
ફાલ્ગુન્યાવિર્ભવાયૈ । રમ્યાયૈ । ધનુર્માસકૃતવ્રતાયૈ ।
ચમ્પકાશોકપુન્નાગમાલતીવિલસત્કચાયૈ । આકારત્રયસમ્પન્નાયૈ ।
નારાયણપદાશ્રિતાયૈ । શ્રીમદષ્ટાક્ષરમન્ત્રરાજસ્થિતમનોધરાયૈ ।
(મનોરથાયૈ) મોક્ષપ્રદાનનિપુણાયૈ । મનુરાજાધિદેવતાયૈ ।
(મનુરત્નાધિદેવતાયૈ) બ્રહ્મણ્યૈ । લોકજનન્યૈ । લીલામાનુષરૂપિણ્યૈ ।
બ્રહ્મજ્ઞાનપ્રદાયૈ । માયાયૈ નમઃ ॥ ૪૦॥

ૐ સચ્ચિદાનન્દવિગ્રહાયૈ નમઃ । મહાપતિવ્રતાયૈ ।
વિષ્ણુગુણકીર્તનલોલુપાયૈ । પ્રપન્નાર્તિહરાયૈ । નિત્યાયૈ ।
વેદસૌધવિહારિણ્યૈ । શ્રીરઙ્ગનાથમાણિક્યમઞ્જરીમઞ્જુભાષિણ્યૈ ।
પદ્મપ્રિયાયૈ । પદ્મહસ્તાયૈ । વેદાન્તદ્વયબોધિન્યૈ । સુપ્રસન્નાયૈ ।
ભગવત્યૈ । શ્રીજનાર્દનજીવિકાયૈ । (જનાર્દનદીપિકાયૈ)
સુગન્ધાવયવાયૈ । ચારુરઙ્ગમઙ્ગલદીપિકાયૈ ।
ધ્વજવજ્રાઙ્કુશાબ્જમાલતિમૃદુપાદતલઞ્છિતાયૈ ।
(કુશાબ્જાઙ્ક) તારકાકારનખરાયૈ । પ્રવાલમૃદુલાઙ્ગુલ્યૈ ।
કૂર્મોપમેયપાદોર્ધ્વભાગાયૈ । શોભનપાર્ષ્ણિકાયૈ ।
વેદાર્થભાવતત્ત્વજ્ઞાયૈ નમઃ ॥ ૬૦॥

ૐ લોકારાધ્યાઙ્ઘ્રિપઙ્કજાયૈ નમઃ । આનન્દબુદ્બુદાકારસુગુલ્ફાયૈ ।
પરમાંશકાયૈ । (પરમાણુકાયૈ) અતુલપ્રતિમાભાસ્વદઙ્ગુલીયકભૂષિતાયૈ ।
(તેજઃશ્રિયોજ્જ્વલધૃતપાદાઙ્ગુલિસુભૂષિતાયૈ)
મીનકેતનતૂણીરચારુજઙ્ઘાવિરાજિતાયૈ । કુબ્જજાનુદ્વયાઢ્યાયૈ ।
(કકુદ્વજ્જાનુયુગ્માઢ્યાયૈ) સ્વરરમ્ભાભશક્તિકાયૈ ।
(સ્વર્ણરમ્ભાભસક્થિકાયૈ) વિશાલજઘનાયૈ । પીતસુશ્રોણ્યૈ ।
મણિમેખલાયૈ । આનન્દસાગરાવર્તગમ્ભીરામ્ભોજનાભિકાયૈ ।
ભાસ્વદ્વલિત્રિકાયૈ । ચારુપૂર્ણલાવણ્યસંયુતાયૈ ।
(ચારુજગત્પૂર્ણમહોદર્યૈ) નવરોમાવલિરાજ્યૈ ।
(નવવલ્લીરોમરાજ્યૈ) સુધાકુમ્ભસ્તન્યૈ । કલ્પમાલાનિભભુજાયૈ ।
ચન્દ્રખણ્ડનખાઞ્ચિતાયૈ । પ્રવાલાઙ્ગુલિવિન્યસ્તમહારત્નાઙ્ગુલીયકાયૈ ।
નવારુણપ્રવાલાભપાણિદેશસમઞ્ચિતાયૈ । કમ્બુકણ્ઠ્યૈ નમઃ ॥ ૮૦॥

ૐ સુચિબુકાયૈ નમઃ । બિમ્બોષ્ઠ્યૈ । કુન્દદન્તયુજે ।
કારુણ્યરસનિષ્પન્દલોચનદ્વયશાલિન્યૈ । (નેત્રદ્વયસુશોભિતાયૈ)
કમનીયપ્રભાભાસ્વચ્ચામ્પેયનિભનાસિકાયૈ ।
(મુક્તાશુચિસ્મિતાચરુચામ્પેયનિભનાસિકાયૈ)
દર્પણાકારવિપુલકપોલદ્વિતયાઞ્ચિતાયૈ ।
અનન્તાર્કપ્રકાશોદ્યન્મણિતાટઙ્કશોભિતાયૈ ।
કોટિસૂર્યાગ્નિસઙ્કાશનાનાભૂષણભૂષિતાયૈ । સુગન્ધવદનાયૈ ।
સુભ્રુવે । અર્ધચન્દ્રલલાટિકાયૈ । પૂર્ણચન્દ્રાનનાયૈ ।
નીલકુટિલાલકશોભિતાયૈ । સૌન્દર્યસીમાવિલસત્કસ્તૂરીતિલકોજ્જ્વલાયૈ ।
ધગદ્ધગાયમાનોદ્યન્મણિ(સીમન્ત) ભૂષણરાજિતાયૈ ।
જાજ્જ્વલ્યમાનસદ્રત્નદિવ્યચૂડાવતંસકાયૈ ।
સૂર્યચન્દ્રાદિકલ્યાણભૂષણાઞ્ચિતવેણિકાયૈ ।
(સૂર્યાર્ધચન્દ્રવિલસદ્ભૂષણાઞ્ચિતવેણિકાયૈ)
અત્યર્કાનલતેજોવન્મણિકઞ્ચુકધારિણ્યૈ । (તેજોઽધિમણિ)
સદ્રત્નજાલવિદ્યોતવિદ્યુત્પુઞ્જાભશાટિકાયૈ । (સદ્રત્નાઞ્ચિત)
નાનામણિગણાકીર્ણકાઞ્ચનાઙ્ગદભૂષિતાયૈ નમઃ ॥ ૧૦૦॥

(હેમાઙ્ગદસુભૂષિતાયૈ)
ૐ કુઙ્કુમાગુરુકસ્તૂરિદિવ્યચન્દનચર્ચિતાયૈ
નમઃ । સ્વોચિતોજ્જ્વલવિદ્યોતવિચિત્રમણિહારિણ્યૈ ।

પરિભાસ્વદ્રત્નપુઞ્જદીપ્તસ્વર્ણનિચોલિકાયૈ ।
અસઙ્ખ્યેયસુખસ્પર્શસર્વાવયવભૂષણાયૈ । (સર્વાતિશયભૂષણાયૈ)
મલ્લિકાપારિજાતાદિદિવ્યપુષ્પશ્રિયાઞ્ચિતાયૈ । શ્રીરઙ્ગનિલયાયૈ ।
પૂજ્યાયૈ । દિવ્યદેવીસેવિતાયૈ નમઃ ॥ ૧૦૮ (દિવ્યદેશસુશોભિતાયૈ)

ઇતિ ગોદાષ્ટોત્તરશતનામાવલિઃ સમાપ્તા ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*godAShTottarashatanAmAvaliH*

pdf was typeset on June 22, 2019

Please send corrections to *sanskrit@cheerful.com*